राहवेन० ॥ केतुंकृण्वन्नकेतवेपेशोमर्याअपेशसे । समुषद्भिरजाय
थाः ॥ ९ ॥ केतवेन० ॥ गणानांत्वाइत्यनेनगणेशंपूजयेत् । ब्रह्म
जज्ञानंप्रथमंपुरस्ताद्विसीमतः सुरुचोवेनआवः । सबुध्न्याउपमा
अस्यविष्ठाःसतश्चयोनिमसतश्चविवः । ब्रह्मणेन०॥ विष्णोरराटम
सिविष्णोःश्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्ध्रुवोसि वैष्णवमसिवि
ष्णवेत्वा ॥ विष्णवेन० ॥ नमःशंभवायचमयोभवायचनमः शंक
रायचमयस्करायचनमःशिवायचशिवतरायच ॥ शिवायन० ॥श्री
श्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणि रूपमश्विनौव्यात्तम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

इष्णान्निषाणामुंमइषाणसर्व्वलोकंमइषाण ॥ लक्ष्म्यैन० ॥ अथ सत्यनारायणपूजाविधिः ॥ ब्रतीसंक्रांतौ पौर्णमास्यां चैकादश्यांयस्मिन्कस्मिन्दिने वा सायंकालेस्नानंकृत्वा पूजास्थानमागत्यासनेउपविश्याचम्यपवित्रधारणंकृत्वा गणेशगौरीवरुणदेवतानांप्रतिष्ठावाहनंकृत्वासंकल्पंकुर्य्यात् ॥ अद्येत्यादि० ॥ अमुकगोत्रोऽमुकशर्म्मासकलदुरितोपशमनसर्व्वापच्छांतिपूर्व्वक सकलमनोरथसिद्ध्यर्थं यथासंपादितसामग्र्यागणेशगौरीवरुणदेवतापूजनपूर्व्वकं पूत्यादि पंचलोकपालदेवतासूर्य्यादि नवग्रहदेवतापूजनपूर्व्वकं पू

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

व्वांगीकृतश्रीसत्यनारायणपूजनकथाश्रवणमहंकरिष्ये ॥ गणे
शादिभ्योन० ॥ अर्घ्यपाद्याचमनीयस्नानगंधाक्षत पुष्पधूपदीप
नैवेद्याचमनीयमुखवासतांबूलपूगीफलद्रव्याणि तत्तन्मंत्रैः समर्प
यामि एवंसूर्य्यादिग्रहाणांतत्तन्मंत्रैःपूजनंकुर्य्यात् ॥ अथसत्यना
रायणपूजनप्रकारमाह ॥ पुष्पंगृहीत्वाध्यानंकुर्य्यात् ॥ ध्यायेत्स
त्यंगुणातीतंगुणत्रयसमन्वितं लोकनाथंत्रिलोकेशंकौस्तुभाभरणं
हरिं ॥ १ ॥ नीलवर्णंपीतवासंश्रीवत्सपदभूषितं गोविंदंगोकुला
नंदंब्रह्माद्यैरपिपूजितम् ॥ २ ॥ इतिध्यानं ॥ आगच्छागच्छदेवेश

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

तैंजोरा।शेजगत्पते क्रियमाणांमयापूजांगृहाणसुरसत्तम ॥ इत्या
वाहनं ॥ नानारत्नसमायुक्तंकार्त्तस्वरविभूषितं आसनंदेवदेवेश
प्रीत्यर्थंप्रतिगृह्यतां ॥ २ ॥ इत्यासनं ॥ नारायणनमस्तेस्तुनरका
र्णवतारक पाद्यंगृहाणदेवेशममसौख्यंविवर्द्धय ॥ ३ ॥ इतिपाद्यं
व्यक्ताव्यक्तस्वरूपायहृषीकपतयेनमः मयानिवेदितोभक्त्याऽर्घो
यंप्रतिगृह्यतां ॥ ४ ॥ इत्यर्घ्यं ॥ मंदाकिन्यास्तुयद्वारेसर्व्वपाप
हरंशुभं तदिदंकल्पितंदेवसम्यगाचम्यतांमया ॥ ५ ॥ इत्याचम
नं ॥ स्नानंपंचामृतैर्देवगृहाणपुरुषोत्तम अनाथनाथसर्व्वज्ञगीर्वा

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

णप्रणतिप्रिय ॥ ६ ॥ इतिस्नानं ॥ वेदसूक्तसमायुक्तैर्यज्ञसामसम
न्विते सर्व्ववर्णप्रदेदेववाससीप्रतिगृह्यतां ॥ ७ ॥ इतिवस्त्रं ॥ ब्रह्म
विष्णुमहेशैश्चनिर्मितंब्रह्मसूत्रकं यज्ञोपवीतदानेनप्रीयतांकमलाप
तिः ॥ ८ ॥ इतियज्ञोपवीतं ॥ श्रीखंडचंदनंदिव्यगंधाढ्यंसुमनो
हरं विलेपनंसुरश्रेष्ठचंदनंप्रतिगृह्यतां ॥ ९ ॥ इतिचंदनं ॥ माल्ति
कादिसुगंधीनिमालत्यादीनिवैप्रभो मयाहृतानिपूजार्थंपुष्पाणि
प्रतिगृह्यतां ॥ १० ॥ इतिपुष्पाणि ॥ वनस्पतिरसोद्भूतोगंधा
ढ्योगंधउत्तमः आघ्रेयःसर्व्वदेवानांधूपम्प्रतिगृह्यतां ॥ ११ ॥ इ

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

तिधूपं ॥ सार्ज्यचवर्त्तिसंयुक्तंवन्हिनायोजितंमया दीपंगृहाणदेवे
शत्रैलोक्यतिमिरापह ॥ १२ ॥ दीपं ॥ घृतपक्कहविष्यान्नं गायसं
चसशर्करं नानाविधंचनैवेद्यंविष्णोमेप्रतिगृह्यतां ॥ १३ ॥ नैवेद्यं
सर्व्वपापहरंदिव्यगांगेयंनिर्मलंजलं आचमनंमयादत्तंगृह्यतांपुरु
षोत्तम ॥ १४ ॥ इत्याचमनं ॥ लवंगकर्पूरयुतंताबूलंसुरपूजितं प्री
त्यागृहाणदेवेशममसौख्यंबिवर्द्धय ॥ १५ ॥ इतिताबूलं ॥ इदंफ
लंमयादेवस्थापितंपुरतस्तवतेनमेसुफलावाप्तिर्भवेज्जन्मनिजन्मनि
इतिफलं ॥ चतुर्वर्त्तिसमायुक्तंघृतेनचसुपूरितं नीराजनेनसंतुष्टोभ

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

वत्येवजगत्पतिः ॥ १७ ॥ इतिनीराजनं ॥ यानिकानिचपापा
निजन्मांतरकृतानिच तानितानिविनश्यंतिप्रदक्षिणापदेपदे १८
प्रदक्षिणां ॥ ततःपुष्पांजलिंनमस्कारांश्चकृत्वास्तुवीत ॥ यन्मया
भक्तियुक्तेनपत्रंपुष्पंफलंजलं निवेदितंचनैवेद्यंतद्गृहाणानुकंपया १
मंत्रहीनंक्रियाहीनंभक्तिहीनंजनार्दन यत्पूजितंमयादेवपरिपूर्णं
तदस्तुमे ॥ २ ॥ अमोघंपुंडरीकाक्षंनृसिंहंदैत्यसूदनं हृषीकेशंज
गन्नाथंवागीशं वरदायकं ॥ ३ ॥ गुणत्रयगुणातीतंगोविंदंगरुड
ध्वजं जनार्दनंजनातीतंजानकीवल्लभंहरिं ॥ ४ ॥ प्रणमामिसदा

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

भक्त्यानारायणमतःपरं दुर्गमेविषमेघोरेशत्रुभिःपरिपीडिते ॥ ५ निस्तारयस्वसर्व्वेषुतथानिष्टभयेषुच नामान्येतानिसंकीर्त्यईप्सितंफलमाप्नुयात् ॥ ६ ॥ सत्यनारायणंदेवंवंदेहंकामदंप्रभुं लीलयाविततंविश्वंयेनतस्मैनमोनमः ॥ ७ ॥ इतिप्रार्थना ॥ अथकथा ॥ ऋषयऊचुः ॥ एकदानैमिषारण्येऋषयःशौनकादयः पप्रच्छुर्मुनयःसर्व्वेसूतंपौराणिकंखलु ॥ व्रतेनतपसाकिंवाप्राप्यतेवांछितंफलं तत्सर्व्वंश्रोतुमिच्छामःकथयस्वमहामुने ॥ २ ॥ सूतउवाच ॥ नारदेनैवसंपृष्टोभगवान्कमलापतिः सुरर्षयेयथैवाहतच्छृणुध्वंसमा

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

स० ११

हिताः ॥ ३ ॥ एकदानारदोयोगीपरानुग्रहकाक्षया पर्य्यटन्वि
विधाल्लोकान्मर्त्यलोकमुपागतः ॥ ४ ॥ ततोदृष्ट्वाजनान्स
र्व्वान्नानाक्लेशसमन्वितान् नानायोनिसमुत्पन्नान्क्लिश्यमानान्स्व
कर्म्मभिः ॥ ५ ॥ केनोपायेनचैतेषांदुःखनाशोभवेद्ध्रुवं इतिसंचिं
त्यमनसाविष्णुलोकंगतस्तदा ॥ ६ ॥ तत्रनारायणंदेवंशुक्लवर्णं
चतुर्भुजं । शंखचक्रगदापद्मवनमालाविभूषितं ॥ ७ ॥ दृष्ट्वातं
देवदेवेशंस्तोतुंसमुपचक्रमे । नारदउ० ॥ नमोवाङ्मनसातीत
रूपायानंतशक्तये ॥ ८ ॥ आदिमध्यांतहीनायनिर्गुणायगुणात्म

क०

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

नें सर्व्वेषामादिभूतायभक्तानामार्त्तिनाशने ॥ ९ ॥ श्रुत्वास्तोत्रंत
तोविष्णुर्नारदंप्रत्यभाषत । श्रीभगवानुवाच ॥ किमर्थमागतोसि
त्वंकिंतेमनसिवर्त्तते ॥ १० ॥ कथयस्वमहाभागतत्सर्व्वंकथयामिते
नारदउ० ॥ मर्त्यलोकेजनाःसर्व्वेनानाक्लेशसमन्विताः । नानायो
निसमुत्पन्नाः । पच्यंतेपापकर्म्मभिः ॥ ११ तत्कथंशमयेन्नाथल
घूपायेनतद्वद । श्रोतुमिच्छामितत्सर्व्वंकृपास्तियादितेमयि १२
श्रीभगवानुवाच ॥ साधुपृष्टंत्वयावत्सलोकानुग्रहकांक्षया । य
त्कृत्वामुच्यतेमोहात्तच्छृणुष्ववदामिते ॥ १३ ॥ व्रतमस्तिमहत्पु

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

प्यंस्वर्गेमर्त्येचदुर्लभं । तवस्नेहान्मयावत्सप्रकाशःक्रियतेधुना १४
सत्यनारायणस्यैवंव्रतंसम्यग्विधानतः । कृत्वासद्यःसुखंभुक्त्वा
परत्रमोक्षमाप्नुयात् ॥ १५ ॥ तत्श्रुत्वाभगवद्वाक्यंनारदोमुनिर
ब्रवीत् । नारदउ० ॥ किंफलंकिंविधानंचकृतंकेनैवतद्व्रतम् ॥ १६ ॥
तत्सर्व्वंविस्तराद्ब्रूहिकदाकार्य्यंहितद्व्रतं । श्रीभगवानुवाच ॥ दुः
खशोकादिशमनंधनधान्यप्रवर्द्धनं ॥ १७ ॥ सौभाग्यसंततिकरं
सर्व्वत्रविजयप्रदं । यस्मिन्कस्मिन्दिनेमर्त्योभक्तिश्रद्धासमन्वि
तः ॥ १८ ॥ सत्यनारायणंदेवंयजेच्चैवनिशामुखे । ब्राह्मणैर्बांधवै

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

श्रैवसहितोधर्म्मतत्परः ॥ १९ ॥ नैवेद्यंभक्तितोदद्यात्सपादंभक्ष्य
मुत्तमं । रंभाफलंघृतंक्षीरंगोधूमस्यचचूर्णकं ॥ २० ॥ अभावेशा
लिचूर्णंवाशर्कराचगुडंतथा । सपादंसर्व्वभक्ष्याणिचैकीकृत्यनिवे
दयेत् ॥ २१ ॥ विप्रायदक्षिणांदद्यात्कथांश्रुत्वाजनैःसह । ततश्च
बंधुभिःसार्द्धंविप्रांश्चप्रतिभोजयेत् ॥ २२ ॥ सपादंभक्षयेद्भक्त्या
नृत्यगीतादिकंचरेत् । ततश्चस्वगृहंगच्छेत्सत्यनारायणंस्मरन् २३
एवंकृतेमनुष्याणांवांछासिद्धिर्भवेद्ध्रुवं । विशेषतःकलियुगेलघूपा
योस्तिभूतले ॥ २४ ॥ इतिश्रीस्कंदपुराणेरेवाखंडेसत्यनारायण

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

कथायांप्रथमोऽध्यायः ॥ १ ॥ सूतउ० ॥ अथान्यत्संप्रवक्ष्यामिकृ
तंयेनपुराद्विज । कश्चित्काशीपुरेरम्येह्यासीद्विप्रोऽतिनिर्द्धनः ॥१
क्षुत्तृड्भ्यांव्याकुलोभूत्वानित्यंवभ्रामभूतले । दुःखितंब्राह्मणंद
ष्ट्वाभगवान्ब्राह्मणप्रियः ॥ २ ॥ वृद्धब्राह्मणरूपस्तंपप्रच्छद्विज
मादरात् । किमर्थंभ्रमसेविप्रमहींनित्यंसुदुःखितः ॥ ३ ॥ तत्सर्वं
श्रोतुमिच्छामिकथ्यतांद्विजसत्तम ब्राह्मणउ० ॥ ब्राह्मणोऽतिद
रिद्रोऽहंभिक्षार्थंवैभ्रमेमहीं ॥ ४ ॥ उपायंयदिजानासिकृपयाकथ
यप्रभो । वृद्धब्राह्मणउ० ॥ सत्यनारायणोविष्णुर्वांछितार्थफलप्र

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

दः ॥ ५ ॥ तस्यत्वंपूजनंविप्रकुरुष्वव्रतमुत्तमं यत्कृत्वासर्व्वदुखे
भ्योमुक्तोभवतिमानवः ॥ ६ ॥ विधानंचव्रतस्यापिविप्रायाभाष्य
यत्नतः सत्यनारायणोवृद्धस्तत्रैवांतरधीयत ॥ ७ ॥ तद्व्रतंसंक
रिष्यामियदुक्तंब्राह्मणेनवै इतिसंचिंत्यविप्रो ऽसौरात्रौनिद्रांनल
ब्धवान् ॥ ८ ॥ ततःप्रातःसमुत्थायसत्यनारायणव्रतं करिष्येइ
तिसंकल्प्यभिक्षार्थमगमद्द्विजः ॥ ९ ॥ तस्मिन्नेवदिनेविप्रः प्रचु
रंद्रव्यमाप्तवान् तेनैवबंधुभिःसार्द्धंसत्यस्यव्रतमाचरत् ॥ १० ॥स
र्वदुःखविनिर्मुक्तःसर्वसंपत्समन्वितः वभूवसद्विजश्रेष्ठोव्रतस्यास्य

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

प्रभावतः ॥ ११ ॥ ततःप्रभृतिकालेचमासिमासिव्रतेकृतं एवंना
रायणस्येदंव्रतंकृत्वाद्विजोत्तमः ॥ १२ ॥ सर्व्वपापविनिर्मुक्तोदुर्ल
भंमोक्षमाप्तवान् व्रतमस्ययदाविप्रपृथिव्यांसंकरिष्यति ॥ १३ ॥
तदैवसर्व्वदुःखंचमनुजस्यविनश्यति एवंनारायणेनोक्तंनारादाय
महात्मने मयातत्कथितंविप्राःकिमन्यत्कथयामिवः ॥ १४ ॥ ऋ
षयऊचुः ॥ तस्माद्विप्रात्श्रुतंकेनपृथिव्यांचरितंमुने तत्सर्व्वंश्रो
तुमिच्छामःश्रद्धास्माकंप्रजायते ॥ १५ ॥ सूतउ० ॥ शृणुध्वंमुन
यःसर्व्वंव्रतंयेनकृतंभुवि एकदासद्विजवरोयथाविभवविस्तरैः १६ ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

वंधुभिःस्वजनैःसार्द्धंव्रतंकर्तुंसमुद्यतः एतस्मिन्नंतरेकालेकाष्ठक्रेता समागमत् ॥ १७॥ बहिःकाष्ठंचसंस्थाप्यविप्रस्यगृहमाययौ तृष्णयापीडितात्माचदृष्ट्वाविप्रंकृतव्रतं ॥ १८॥ प्रणिपत्यद्विजंप्राह किमिदंक्रियतेत्वया कृतेनकिंफलमाप्नोतिविस्तराद्वदमेप्रभो १९ विप्रउ०॥ सत्यनारायणस्येदंव्रतंसर्वेप्सितप्रदं तस्यप्रसादान्मेसर्वं धनधान्यादिकंमहत् ॥ २० ॥ तस्मादेतद्व्रतंज्ञात्वाकाष्ठक्रेतातिहर्षितः पपौजलंप्रसादंचभुक्त्वासनगरंययौ ॥ २१ ॥ सत्यनारायणंदेवंमनसाइत्यचिंतयत् काष्ठविक्रयतोग्रामेप्राप्यतेचाद्ययद्धनं२२

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

तेनैवसत्यदेवस्यकरिष्येव्रतमुत्तमं इतिसंचिंत्यमनसाकार्ष्टंकृत्वातु
मस्तके ॥ २३ ॥ जगामनगरेरम्येधनिनांयत्रसंस्थितिः तद्दिनेका
ष्टमूल्यंचद्विगुणंप्राप्तवानसौ ॥ २४ ॥ ततःप्रसन्नहृदयःसुपक्वंकद
लीफलं शर्करांघृतदुग्धंचगोधूमस्यचचूर्णकं ॥ २५ ॥ कृत्वैकत्रस
पादंचगृहीत्वास्वगृहंययौ ततोबंधूनसमाहूयचकारविधिनाव्रतं॥
तद्व्रतस्यप्रभावेणधनपुत्रान्वितोभवत् इहलोकेसुखंभुक्त्वाचांतेस
त्यपुरंययौ ॥ २७॥ इतिसत्यनारायणकथायांद्वितीयोध्यायः२ ॥
सूतउ० ॥ पुनरग्रेप्रवक्ष्यामिशृणुध्वंमुनिसत्तमाः पुराचोल्कामुखो

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

स० २० नामनृपश्चासीन्महीपतिः ॥ १ ॥ जितेंद्रियःसत्यवादीययौदेवाल क०
यंप्रति दिनेदिनेधनंदत्वाद्विजान्संतोषयत्सुधीः ॥ २ ॥ भार्य्या
तस्यप्रमुग्धाचसरोजवदनासती भद्रशीलानदीतीरेसत्यस्यव्रत
माचरत् ॥ ३ ॥ एतस्मिन्नंतरेतत्रसाधुरेकःसमागतःवाणिज्यार्थं
बहुधनैरनेकैःपरिपूरितः ॥ ४ ॥ नावंसंस्थाप्यतत्तीरेजगामनृप
तिंप्रति दृष्ट्वासव्रतिनंभूपंपप्रच्छविनयान्वितः ॥ ५ ॥ साधुउ०
किमिदंकुरुपेराजन्भक्तियुक्तेनचेतसा । प्रकाशंकुरुतत्सर्वंश्रोतु
मिच्छामिसांप्रतं ॥ ६ ॥ राजोवाच ॥ पूजनंक्रियतेसाधोविष्णोर

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

तस्मादेकंवणिक्पुत्रंसमादायाऽऽगतोहिसः । दृष्ट्वातुसुंदरंबालंव
णिक्पुत्रंगुणान्वितं ॥ १९ ॥ ज्ञातिभिर्बंधुभिःसार्द्धंपरितुष्टेनचेतसा
दत्तवान्साधुःपुत्रायकन्याविधिविधानतः ॥ २० ॥ ततोभाग्यव
शात्तेनविस्मृतंव्रतमुत्तमं । विवाहसमयेतस्यास्तेनरुष्टोऽभवत्प्रभुः
ततःकालेनानियतोनिजकर्म्मविशारदः । वाणिज्यार्थंततःशीघ्रंजा
मातृसहितोवणिक् ॥ २२ ॥ रत्नसारपुरेरम्येगत्वासिंधुसमीपतः
वाणिज्यमकरोत्साधुर्जामात्राश्रीमतासह ॥ २३ ॥ तौगतौनगरे
रम्येचंद्रकेतोर्नृपस्यच । एतस्मिन्नेवकालेतुसत्यनारायणःप्रभुः२४

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

भ्रष्टप्रतिज्ञमालोक्य शापं तस्मै प्रदत्तवान् । दारुणं कठिनं चास्य महद्दुःखं भविष्यति ॥ २५ ॥ एकस्मिन्दिवसे राज्ञो धनमादाय तस्करः । तत्रैव च गतश्चोरौ वणिजौ यत्र संस्थितौ ॥ २६ ॥ तत्पश्चाद्धावकान्दूतान्दृष्ट्वा भीतेन चेतसा । धनं संस्थाप्य तत्रैव स तु शीघ्रमलक्षितः ॥ २७ ॥ ततो दूताः समायाता यत्रास्ते सज्जनो वणिक् । दृष्ट्वा नृपधनं तत्र बध्वा नीतौ वणिक्सुतौ ॥ २८ ॥ हर्षेण धावमानाश्च ऊचुर्नृपसमीपतः । तस्करौ द्वौ समानीतौ विलोक्याज्ञापय प्रभो २९ राज्ञाज्ञप्तास्ततः शीघ्रं दृढं बध्वा तु तावुभौ । स्थापितौ द्वौ महादुर्गे का

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

त्वयाधुना नोचेत्त्वांनाशयिष्यामिसराज्यधनपुत्रकं ॥ ४२ ॥ ए
वमाभाष्यराजानंध्यानगम्यो ऽभवत्प्रभुः ततःप्रभातसमयेराजा
चस्वजनैःसह ॥ ४३ ॥ उपविश्यसभामध्येप्राहस्वप्रजनेप्रति व
द्वौमहाजनौशीघ्रंमोचयद्वौवाणिक्सुतौ ॥ ४४ ॥ इतिराज्ञोवचःश्रु
त्वामोचयित्वामहाजनौ समानीयनृपस्याग्रेप्राहस्तेविनयान्वि
ताः ॥ ४५ ॥ आनीतौद्वौवाणिक्पुत्रौमुक्तौनिगडबंधनात् ततोम
हाजनौनत्वाचंद्रकेतुंनृपोत्तमं ॥ ४६ ॥ स्मरंतौपूर्ववृत्तांतंनोचतु
र्भयविव्हलौ राजावणिक्सुतौवीक्ष्यवचःप्रोवाचसादरं ॥ ४७ ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

दैवात्प्राप्तंमहद्दुःखमिदानींनास्तिवैभयं तदानिगडसेत्यागंक्षौरक
र्म्माद्यकारयत् ॥ ४८ ॥ वस्त्रालंकारकंदत्वापरितोष्यनृपश्चतौ पु
रस्कृत्यवणिक्पुत्रौवचसातोषयद्भृशं ॥ ४९ ॥ पुरानीतंतुयद्द्रव्यंद्वि
गुणीकृत्यदत्तवान् प्रोवाचतौततोराजागच्छसाधोनिजाश्रमं॥५०
राजानंप्रणिपत्याहगंतव्यंत्वत्प्रसादतः॥ ५१ ॥ इतिसत्यनारायण
व्रतकथायांतृतीयोऽध्यायः ॥ ३ ॥ सूतउवाच ॥ यात्रांतुकृतवान्
साधुर्मंगलायनपूर्व्विकां ब्राह्मणायधनंदत्वातदातुनगरंययौ॥ १
कियद्दूरेगतेसाधौसत्यनारायणःप्रभुः जिज्ञासांकृतवान्साधोकि

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

मास्तितवनौस्थितं ॥ २ ॥ ततोमहाजनौमत्तौहेलयाचप्रहस्यवै ।
कथंपृच्छसिभोदंडिन्मुद्रांनेतुंकिमिच्छसि ॥ ३ ॥ लतापत्रादिकं
चैववर्तंतेतरणौमम निष्ठुरंचवचःश्रुत्वासत्यंभवतुतेवचः ॥ ४ ॥ एव
मुक्त्वागतःशीघ्रंदंडीतुस्यसमीपतः कियद्दूरेततोगत्वास्थितःसिंधु
समीपतः ॥ ५ ॥ गतेदंडिनिसाधुश्चकृतनित्याक्रियस्तदा उत्थितां
तरणींदृष्ट्वाविस्मयंपरमंययौ ॥ ६ ॥ दृष्ट्वालतादिकंचैवमूर्च्छितो
न्यपतद्भुवि लब्धसंज्ञोवणिक्पुत्रस्ततश्चिंतान्वितोऽभवत् ॥ ७ ॥
तदातुदुहितुःकांतोवचनंचेदमब्रीत् किमर्थंक्रियतेशोकःशापोदत

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA

०स
३०

श्रदंडिना ॥ ८ ॥ शक्यतेतेनसर्व्वंहिकर्तुंचात्रनसंशयः अतस्त
च्छरणंयामोवांछितार्थोभविष्यति ॥ ९ ॥ जामातुर्व्वचनंश्रुत्वात
त्सकाशंगतस्तदा दृष्ट्वाचदंडिनंभक्त्यानत्वाप्रोवाचसादरं ॥१०
क्षमस्वचापराधंमेयदुक्तंतवसन्निधौ एवंपुनःपुनर्नत्वामहाशोकाकु
लोभवत् ॥ ११ ॥ प्रोवाचवचनंदंडीविलपंतंविलोक्यच मारोदीः
शृणुमद्वाक्यंममपूजाबहिर्मुखः ॥ १२ ॥ ममाज्ञयाचदुर्बुद्धेलब्धंदुः
खंमुहुर्मुहुः तत्श्रुत्वाभगवद्वाक्य स्तुतिंकर्तुंसमुद्यतः ॥ १३ ॥
साधुरुवाच ॥ त्वन्मायामोहिताःसर्व्वेब्रह्माद्यास्त्रिदिवौकसः नजा

CCO, Gurukul Kangri Collection, Haridwar, Digitized by S3 Foundation, USA